श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्) अनुगृहीता

# ॥ श्रीनिवासप्रपदनस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनिवासप्रपदनस्तुतिः ॥

कवेरकन्यासुतटेऽतिरम्ये
श्रीवेणुगोपालसहाधिवासम्।
भक्तानुकम्पार्थकृतावतारं
श्रीश्रीनिवासं शरणं प्रपद्ये ॥ 1 ॥

क्षेत्रे पवित्रे कृतशालिगोत्रे
मुदा वसन्तं सकलेष्टदं हरिम्।
अपारसंसारसमुद्रसेतुं
रमानिवासं शरणं प्रपद्ये ॥ 2 ॥

कावेरिकाकूलसुशालिशालि
श्रीसोसलेनाम्नि पुरे वसन्तम्।
ददानमासेचनकं सुदर्शनं
लक्ष्मीनिवासं शरणं वृणोऽहम् ॥ 3 ॥

महीसुराराधितपादपद्मं
पद्मानिवासं करुणालुमार्तिहम्।
अस्मद्गुरूदारपरंपराभिः
संसेवितं तं शरणं व्रजामि ॥ 4 ॥

नमस्ते नमस्ते कटिन्यस्तपाणे
सदादर्शितात्मीयपादैकपाणे।
स्थिरां देहि भक्तिं भवत्पादपद्मे
प्रदेहि श्रियं निश्चलां श्रीनिवास ॥ 5 ॥

पञ्चपद्यां स्तुतिं भक्तिपद्यामाश्रित्य यः पठेत्।
गोपालगीतां सततं लभेतात्मेप्सितं फलम्॥ **6**॥

॥ इति श्रीनिवासप्रपदनस्तुतिः समाप्ता॥